# .. 108 Names of Shri Ram ..
# ॥ श्रीरामाष्टोत्तर शतनामावलिः ॥

ॐ श्रीरामाय नमः ।
ॐ रामभद्राय नमः ।
ॐ रामचंद्राय नमः ।
ॐ शाश्वताय नमः ।
ॐ राजीव-लोचनाय नमः । ५ ।
ॐ श्रीमते नमः ।
ॐ राजेन्द्राय नमः ।
ॐ रघुपुंगवाय नमः ।
ॐ जानकी-वल्लभाय नमः ।
ॐ जैत्राय नमः ॥ १० ॥
ॐ जितामित्राय नमः ।
ॐ जनार्दनाय नमः ।
ॐ विश्वामित्र-प्रियाय नमः ।
ॐ दांताय नमः ।
ॐ शरणत्राण-तत्पराय नमः । १५ ।
ॐ वालि-प्रमथनाय नमः ।
ॐ वाग्मिने नमः ।
ॐ सत्यवाचे नमः ।
ॐ सत्यविक्रमाय नमः ।
ॐ सत्यव्रताय नमः ॥ २० ॥
ॐ व्रतधराय नमः ।
ॐ सदा-हनुमदाश्रिताय नमः ।
ॐ कौसलेयाय नमः ।
ॐ खर-ध्वसिने नमः ।
ॐ विराध-वधपंडिताय नमः । २५ ।
ॐ विभीषण-परित्रात्रे नमः ।
ॐ हरकोदंड-खंडनाय नमः ।
ॐ सप्तताल-प्रभेत्त्रे नमः ।
ॐ दशग्रीव-शिरोहराय नमः ।
ॐ जामदग्न्य-महादर्प-दलनाय नमः ॥ ३० ॥
ॐ ताटकान्तकाय नमः ।
ॐ वेदन्तसाराय नमः ।
ॐ वेदात्मने नमः ।
ॐ भवरोगस्य-भेषजाय नमः ।
ॐ दूषण-त्रिशिरो-हंत्रे नमः । ३५ ।
ॐ त्रिमूर्तये नमः ।
ॐ त्रिगुणात्मकाय नमः ।
ॐ त्रिविक्रमाय नमः ।
ॐ त्रिलोकात्मने नमः ।
ॐ पुण्यचारित्र-कीर्तनाय नमः ॥ ४० ॥
ॐ त्रिलोक-रक्षकाय नमः ।
ॐ धन्विने नमः ।
ॐ दंडकारण्य-कर्तनाय नमः ।
ॐ अहल्याशाप-शमनाय नमः ।
ॐ पितृभक्ताय नमः । ४५ ।
ॐ वरप्रदाय नमः ।
ॐ जितेन्द्रियाय नमः ।
ॐ जित-क्रोधाय नमः ।
ॐ जितामित्राय नमः ।
ॐ जगद्गुरवे नमः ॥ ५० ॥
ॐ ऋक्ष-वानर-संघातिने नमः ।
ॐ चित्रकूट-समाश्रयाय नमः ।
ॐ जयंतत्राण-वरदाय नमः ।
ॐ सुमित्रापुत्र-सेविताय नमः ।
ॐ सर्व-देवाधिदेवाय नमः । ५५ ।
ॐ मृतवानर-जीवनाय नमः ।
ॐ मायामारीच-हंत्रे नमः ।
ॐ महादेवाय नमः ।
ॐ महाभुजाय नमः ।
ॐ सर्वदेव-स्तुताय नमः ॥ ६० ॥
ॐ सौम्याय नमः ।
ॐ ब्रह्मण्याय नमः ।
ॐ मुनि-संस्तुताय नमः ।
ॐ महायोगिने नमः ।
ॐ महोदाराय नमः । ५५ ।
ॐ सुग्रीवेप्सित-राज्यदाय नमः ।
ॐ सर्वपुण्याधिक-फलाय नमः ।
ॐ स्मृत-सर्वाघ-नाशनाय नमः ।
ॐ आदिपुरुषाय नमः ।
ॐ परम-पुरुषाय नमः ॥ ७० ॥
ॐ महा-पुरुषाय नमः ।
ॐ पुण्योदयाय नमः ।
ॐ दयासाराय नमः ।
ॐ पुराण-पुरुषोत्तमाय नमः ।
ॐ स्मित-वक्त्राय नमः । ७५ ।

ॐ मित-भाषिणे नमः ।
ॐ पूर्व-भाषिणे नमः ।
ॐ राघवाय नमः ।
ॐ अनन्त-गुणगंभीराय नमः ।
ॐ धीरोदात्त-गुणोत्तमाय नमः ॥ ८०॥
ॐ मायामानुष-चरित्राय नमः ।
ॐ महादेवादि-पूजिताय नमः ।
ॐ सेतु-कृते नमः ।
ॐ जित-वाराशिये नमः ।
ॐ सर्वतीर्थमयाय नमः । ८५ ।
ॐ हरये नमः ।
ॐ श्यामांगाय नमः ।
ॐ सुन्दराय नमः ।
ॐ शूराय नमः ।
ॐ पीतवाससे नमः ॥ ९०॥
ॐ धनु-र्धराय नमः ।
ॐ सर्व-यज्ञाधिपाय नमः ।
ॐ यज्वने नमः ।
ॐ जरा-मरण-वर्जिताय नमः ।
ॐ विभीषण-प्रतिष्ठात्रे नमः । ९५ ।
ॐ सर्वापगुण-वर्जिताय नमः ।
ॐ परमात्मने नमः ।
ॐ परस्मै-ब्रह्मणे नमः ।
ॐ सच्चिदानन्द-विग्रहाय नमः ।
ॐ परस्मै ज्योतिषे नमः ॥ १००॥
ॐ परस्मै-धाम्ने नमः ।
ॐ पराकाशाय नमः ।
ॐ परात्पराय नमः ।
ॐ परेशाय नमः ।
ॐ पारगाय नमः । १०५ ।
ॐ पाराय नमः ।
ॐ सर्व-देवात्मकाय नमः ।
ॐ परस्मै नमः ॥ १०८॥
॥श्रीरामाष्टोत्तरशतनामावलिः समाप्तः ॥

Encoded and proofread by
N.Balasubramanian bbalu@satyam.net.in

Please send corrections to sanskrit@cheerful.com
Last updated May 4, 2008